# संस्कृत वार्ताः

दिनाङ्क :-20.11.2025 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री- कोयम्बटूर

प्रधानमन्त्री श्रीनरेन्द्र-मोदी ह्यः तमिलनाडु-राज्यस्य कोयम्बटूर-नगरे नव-कोटि-कृषकाणां कृते अष्टादश-सहस्रकोटिरूप्यकाणां एकविंशतितमं प्रधानमन्त्री-कृषक-सम्मानन-धनराशि-खण्डस्य विमोचनं कृतवान् । अस्मिन्नवसरे श्रीमोदी दक्षिण-भारतीय-प्राकृतिक-कृषिशिखर-सम्मेलनस्य उद्घाटनमपि कृतवान् । सभां सम्बोधयन् श्रीमोदी उक्तवान्, यद् विगत-एकादश-वर्षेषु कृषिक्षेत्रे परिवर्तनकारिपरिष्काराः दृष्टाः। सः अवदत् यत्, देशः प्राकृतिक-कृषेः वैश्विककेन्द्रस्य मार्गे अग्रेसरति ।

प्रधानमन्त्रिणा उक्तं, यत् किसान-क्रेडिट-कार्ड-द्वारा कृषकाः दश-लक्षकोटि-रूप्यकाणां लाभं प्राप्तवन्तः। अस्मिन् अवसरे प्रधानमन्त्री मोदी विशिष्टान् पञ्च-प्राकृतिक-कृषी-विशेषज्ञान् अपि अभिनन्दितवान् ।

### बिहार-शपथग्रहणम्

जेडियु इति सम्युक्त-जनता-दलस्य प्रमुखः श्रीनीतीश-कुमारः अद्य दशमवारं, बिहारस्य मुख्यमन्त्रीरूपेण, शपथं ग्रहीष्यति । पटनानगरस्य ऐतिहासिकगान्धी-मैदान इत्यत्र प्रातः सार्धएकादशवादने शपथ-ग्रहण-समारोहः भविष्यति । कार्यक्रमे प्रधानमन्त्री नरेन्द्रमोदी तथा अनेके नेतारः, मान्याश्च उपस्थिताः भविष्यन्ति । ह्यः नीतीशकुमारः एनडीए इत्यस्य राष्ट्रिय-लोकतांत्रिक-घटबन्धनस्य विधायक-दलस्य नेतृरूपेण निर्वाचितः आसीत् । पटनानगरे घटबन्धनस्य पञ्चघटकदलानां नवनिर्वाचित-विधायकानां संयुक्तसभायां एषः निर्णयः कृतः।

### राष्ट्रपतिः-यात्रा

राष्ट्रपतिः द्रौपदी मुर्मूः अद्यारभ्य छत्तीसगढ, तेलंगाना, आन्ध्र प्रदेश राज्याणां त्रिदिवसीययात्रायां भविष्यति । छत्तीसगढस्य यात्रायां राष्ट्रपतिः अम्बिकापुरे जनजातीय-गौरवदिवस-उत्सवस्य शोभां वर्धयिष्यति । राष्ट्रपतिः मुर्मूः स्वस्य यात्रायाः द्वितीयदिने तेलङ्गाना-राज्यस्य सिकन्दराबाद-नगरस्य राष्ट्रपतिनिलयम् इत्यत्र ऐषमः भारतीय-कलामहोत्सवस्य उद्घाटनं करिष्यति । शनिवासरे राष्ट्रपतिः आन्ध्रप्रदेशस्य पुट्टपर्थि-स्थित-प्रशान्तिनिलयम् इत्यत्र श्री सत्यसाईबाबा इत्यस्य शताब्दि उत्सवे विशेषसत्रस्य शोभां वर्धयिष्यति ।

**प्रधानमन्त्री नरेन्द्रमोदी दक्षिण-आफ्रिका**

प्रधानमन्त्री नरेन्द्रमोदी श्वः आरभ्य त्रयोविंशति-दिनांक-पर्यन्तं दक्षिण-आफ्रिका-देशस्य जोहान्सबर्ग्-नगरस्य यात्रायां भविष्यति । अस्मिन्नवसरे सः विंशति-तमे जी-विंशति-नेतृ-शिखरसम्मेलने भागं गृहीष्यति । वैश्विकदक्षिणे एतत् क्रमशः चतुर्थं जी-विंशति शिखरसम्मेलनं भविष्यति ।

विदेशमन्त्रालयेन सूचितम्, यत् शिखरसम्मेलने प्रधानमन्त्री जी-विंशति इत्यस्य कार्यसूचौ भारतस्य दृष्टिकोणं प्रस्तौति । शिखरसम्मेलनस्य त्रिषु अपि सत्रेषु प्रधानमन्त्री सम्बोधयिष्यतीति अपेक्षा वर्तते ।

**ऑस्ट्रेलियादेशस्य विदेशमन्त्री**

ऑस्ट्रेलियादेशस्य विदेशमन्त्री पेन्नी वोङ्गः ह्यः भारत-यात्रार्थं नवदिल्लीम् प्राप्तवान् । सा अद्य विदेशमन्त्री डॉ. एस जयशङ्करेण सह षोडश-तमे विदेशमन्त्रि-रूपरेखा-संवादस्य सह-अध्यक्षतां करिष्यति । भारत-ऑस्ट्रेलिया-व्यापक-रणनीतिक-सहयोगस्य पृष्ठभूमौ इयं यात्रा महत्त्वपूर्णा वर्तते ।

**अन्ताराष्ट्रिय-चलच्चित्र-महोत्सव**

भारतस्य अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्य आई-एफ़्-एफ़्-आई विंशति-पञ्चविंशतिः इत्यस्य षट्पञ्चाशत्तमं संस्करणम्, अद्य गोवानगरे आरभ्यते । आधिकारिक-पत्रविज्ञप्त्या-नुसारम् अस्मिन् वर्षे विश्वस्य पञ्च अत्युत्तम-चलच्चित्राणि दृश्यन्ते । द्वयोः भारतीयचलच्चित्रयोः मध्ये, तमिल-चलच्चित्र-निर्मातुः दिनेश सेलव-राजस्य गीतात्मकं चलच्चित्रं "कदलकन्नी" बालकान् उद्दिश्य वर्तते ।

**भारतीय-शूटर**

भारतीय-शूटर-पटवः स्वस्य प्रभावशाली प्रदर्शनं निरन्तरं कृत्वा, ह्यः जापानदेशस्य टोकियोनगरे पञ्चविंशति-तमे बधिर-ओलिम्फिक्-क्रीडायां अधिकपदकानि प्राप्तवन्तः ।अभिनवदेश-वालस्य प्राञ्जलि-प्रशांत-धूमलस्य च युगलौ दश मीटर् परिमितायाम् एयर-पिस्टल् मिश्र-स्पर्धायां स्वर्णपदकं प्राप्तवन्तौ। अपरत्र कुशाग्रसिंह राजावतः पञ्चाशत् मीटर् राइफल प्रोन् इति स्पर्धायां कांस्यपदकं प्राप्तवान् । अनेन भारतस्य शूटिंग्-क्षेत्रे पदक-सङ्ख्या एतावता एकादश यावत् अभवत् ।

**भारतीय-ऋतु**

भारतीय-ऋतु-विज्ञान-विभागेन पश्चिममध्यप्रदेशस्य केषुचित् भागेषु अद्य अतीव-शीततरङ्गस्य स्थितेः पूर्वानुमानं कृतम् अस्ति । विभागेन उक्तं यत् आगामिपञ्चदिनेषु मध्यभारते न्यूनतमतापमाने, क्रमेण द्वि - तः चत्वारि - डिग्री सेल्सियसपर्यन्तं वृद्धिः द्रष्टुं शक्यते । विभागेन, तमिलनाडु, पुडुचेरी, कराईकाल, अण्डमान, निकोबारद्वीपेषु अद्य पृथक्-स्थानेषु अधिकवृष्टिः भविष्यति इति पूर्वानुमानं कृतम् अस्ति।

**।।इति वार्ताः।।**